स्मृतिशास्त्रीयन्यायव्यवस्थया सह सन्तालीन्यायव्यवस्थायाः तुलनात्मकमध्ययनम्

रांचीविश्वविद्यालयान्तर्गतानुसन्धानकेन्द्रे
संस्कृतविषये विद्यावारिधिः (पी.एच्.डी)
इत्युपाधिप्राप्तये प्रस्तुतोऽयं शोधपत्रः ।

शोध-प्रवन्धस्य संक्षिप्तिका

फरवरी-2024

शोध-निर्देशिका

डा. सबिता उराँव

सहायिका प्राध्यापिका

संस्कृतविभाग:

रांची विमेंस कॉलेज * रांची

शोधार्थी

नामः - अभिजित् मुर्मू

(NET, SET, JRF)

स्मृतिशास्त्रीयन्यायव्यवस्थया सह सन्तालीन्यायव्यवस्थायाः तुलनात्मकमध्ययनम्

[A comparative judicial study
of the smritishastra and
santal society]

अनुक्रमणिका

विषयसुची	पृष्ठा संख्या
१. प्रस्तावना (Introduction)	१
२. क्षेत्रम् (Area)	२
३. उद्देशः (Purpose)	२
४.प्रक्रिया (Method)	२
५.अध्यायबिभाजनम्	३
५.१ भारतीयन्यायव्यवस्था	३
५.२ स्मृतिकलिनन्यायव्यवस्था	५
५.३ सन्तालीकलिनन्यायव्यवस्था	६
५.४ स्मृतिकलिनऽर्थव्यवस्था (व्यापारः, शासनव्यवस्था, कार्यकौशलश्च)	७
५.५ सन्ताली-अर्थव्यवस्था (व्यापारः, शासनव्यवस्था, कार्यकौशलश्च)	८
५.६. स्मृतिकलिन - सान्ताल्योः च गुणदोषाणां समीक्षणम्	९
६. शोधक्रमः	१०
७. उपसंहरः	१०
८. सन्दर्भः ग्रन्थसूची	११

प्रस्तावितशोधकार्यस्य प्रस्तावना क्षेत्रम् उद्देशः प्रक्रिया च

प्रस्तावना (Introduction)

अहं स्वयं सन्तालः अस्मि , बाल्यकालात् एव अहम् अस्माकं संस्कृतिं, शासनव्यवस्थां, आर्थिकं स्थितिं, उत्सवम् इत्यादीन् पश्यन् अस्मि ।अस्माकं स्वकीया भाषा अस्ति , वर्णाः सन्ति, धर्मः अस्ति, धर्मग्रन्थम् अपि अस्ति।

आदिवासीजनाः स्वकार्यस्य कारणेन अनुसूचितजनजातिपदवीतः वंचिताः भवन्ति, इति कारणेन स्वस्य परिचयं आंशिकरूपेण नष्टं कृतवन्तः , एवं प्रकारेण तेषां सांविधानिकशैक्षिक-आर्थिक-राजनैतिक-अधिकारेभ्यः वञ्चिताः भवन्ति। परन्तु ते स्वस्य केचन रीतिरिवाजाः, विशिष्टाः जीवनशैल्याः च निरन्तरं रक्षणं कुर्वन्ति।

अस्माकं सन्तालीसमाजस्य न्यायव्यवस्थायाः अथवा शासनव्यवस्थायाः अर्थात् सामाजिकन्यायव्यवस्थायाः, आर्थिकन्यायव्यवस्थायाः, राजनैतिकन्यायव्यवस्थायाः, स्मृतिशास्त्रे कीदृशस्य न्यायव्यवस्थायाः उल्लेखः अस्ति इति च तुलनात्मकमध्ययनं कृत्वा मम शोधकार्य्ये पञ्जिकरणं कर्तुम् प्रयासं करोमि।

प्रस्तावितशोधकार्यस्य क्षेत्रम् (Area) :-

एकस्य जाते न्याय-विचार-संस्कृति प्रभृतिभिः साकं अपर एकस्य जातेः सादृश्यं बैसादृश्यं च विद्यते तस्य ज्ञानायहं प्राचीनस्मृतिशास्त्रीयन्यायव्यवस्थायाः समीक्षात्मकम् अध्ययनं पञ्च - अध्यायेषु प्रकाशयितुं प्रयासम् करोमि ।

प्रस्तावितशोधकार्यस्य उद्देशम् (Purpose):-

प्रथमतः-

एकः जातिः नियन्त्रयते न्यायविचारव्यवस्थाभिः । अत्र तथैव स्मृतिशास्त्रनियमस्य सन्तालीनियमस्य च तुलना कृता अस्ति।

द्वितीयतः-

स्मृतिशास्त्रे किम् अस्ति किञ्च सन्ताली शास्त्रे अस्ति , तस्य ज्ञानं लभ्यते ।

तृतीयतः-

प्रत्येकस्य जातेः या आत्मनः विचारधारा अस्ति , अत्र सा प्रकाशिता।

प्रस्तावितशोधकार्यस्य प्रक्रिया (Method):-

अत्र यद्यपि तुलनमुलकपद्धतिः मुख्यरूपेण स्वीकृता तथापि विश्लेषणपद्धतेः निरीक्षणपद्धतेः व्यक्तिगताध्ययनपद्धतेः च प्रभृतिनाम् अलोचानाप्रयोजनार्थम् आश्रयं गृहीतम् ।

अध्ययनेन प्राप्ताः विचारव्यवस्थाः नियमाः वा अधोलिखितमध्यायानुसारं विभक्तः भविष्यति-

प्रथमोध्यायः - भारतीयन्यायव्यवस्था

गणतंत्रिकशासनव्यवस्थाया: अन्यतमः अङ्गस्तु न्यायविभाग: । स्वतन्त्रं निरपेक्षं च न्यायविभागं विना गणतंत्रस्य अस्तित्वरक्षणं न सम्भवेत्। प्रसङ्गेऽस्मिन् स्वमतम् उपस्थायन् मर्किन्-युक्तराष्ट्रियः प्रख्यातः आइनज्ञः Chancellor Kent कथयति - "न्यायिक बाख्या, बिबाद- संबादयोः मीमांसा, अधिकारसमुहान् कर्यकरकरणाय यत्र कोऽपि न्यायविभागः न स्यात् तत्र सर्वकारस्य अस्तित्वमपि न स्यात् । इतोऽपि च अध्यापकः Garner इत्यनेन उक्तम् - "न्यायविभागं विहाय सभ्यराष्ट्रः अकल्पनीय: " (.......a civilized state without judicial organ is hardly conceivable) भारतम् अस्ति पृथिव्यां सर्वबृहत् - गणतान्त्रिकदेशः। स्वाभाबिकतया अत्र न्यायविभागस्य अस्तित्वः विद्यमानः। भारतीयन्यायव्यवस्थाया: प्रधानानि वैशिष्ट्यानि मम शोधकार्येन समुपस्थपयितुं यथायथं प्रयासं करोमि।

द्वितीयोध्यायः :- स्मृतिकलिनन्यायव्यवस्था

स्मृतिशास्त्रे तथा मनु संहितायां स्वगोत्रिय विवाहः निषिद्धः१ परम् भिन्न गोत्रेन विवाहस्य विधानं गृहीतम्।

स्मृतिशास्त्रे पात्रचयनस्य विषये पुरुषमेव नारीचयनस्य अग्राधिकरः प्रदत्तः परं विवाहात् पूर्वम् परस्परमेलनं निषिद्धम् इति उद्घोषितम् । स्मृतिशास्त्रे पणप्रथायाः कथमपि उल्लेखम् अविद्यमाने अपि प्राचीनकाले कन्यापणस्य प्रचलनम् आसीत् । याज्ञवल्क्यः संहितायाम् मनुसंहितायाम् अर्थशास्त्रे च विवाहस्य अष्ट-प्रकारानाम् उल्लेखमस्ति ।

ब्राह्मो दैवस्तथैवार्षः प्रजापत्यस्तथाऽऽसुरः ।

गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ।।२

१.ऋक्. १०.१०(यम-यमी संवादसूक्तः)

२. मनुसंहिता प्रायश्चित्ताध्यायः (श्लोक- २१)

तृतीयोध्यायः. सन्तालीकलिनन्यायव्यवस्था

आदिवासी समाजस्य अधिकांशेषु भागेषु दृश्यते प्रेमविवाहः इति । युवकः कतिपयानि दिनानि पश्यन् एकां युबतीं ज्ञातुं प्रयासं करोति प्रेम्णः च समर्पयति। युवकः तया युबत्या सह तदा एव विवाहं निश्चयति यदा सा युवती प्रेमप्रस्तावं अङ्गीकुर्वति१।

विवाहपद्धत्यां सन्तलीसमाजस्य सादृश्यता दृश्यते । गृहयसूत्रे बौधायन-धर्मसुत्रे च येन प्रकारेण विवाहस्य कालः, पात्र-पात्री निर्वाचनं, दिधिषु प्रेरण , सप्तपदीगमनम्, अग्निप्रदक्षिनं इत्यादयः अनेकाः प्रथा: विवाहे अवश्यं पालनीयम्।

खेरोयालरीत्यानुसारम् अत्रोऽपि सप्तप्रकारानां बिबहानाम् उल्लेखः विद्यते । यथा -

१. सार्-सागुन् वाप्ला ।

२.टुङ्कि डिपिल् वाप्ला।

३.बाहा साहा वाप्ला।

४. अर् इतुत् वाप्ला।

५. घारदि जांयाय वाप्ला।

६. दह रुयाड वाप्ला।

७. इदि गस वाप्ला। २

तस्मात् प्रथमोक्त "सार्-सागुन् वाप्ला" इति विवाह-पद्धत्येब उत्तमः इति स्वीक्रियते। अत्र मध्यगस्य एका विशेषभूमिका विद्यते । सन्ताली भाषया मध्यगम् रायबार: इत्युच्यते। मध्यगस्य कार्यं तु पक्षद्वयस्य सम्मतिबहनम् पक्षद्वयस्य बा सम्मतिप्रदाने साहाय्यकरणम् ।

सन्तालीसमाजे पात्रपक्षेण पात्रीपक्षम् प्रति पणस्य परिमाणं रुपकत्रयं सप्त-रूप्यकाणि बा ईतोऽपि षोड्श-रुप्यकाणि पर्यन्तं प्रदानस्य रीतिरस्ति २. । इतोऽपि पणेन सह धेनोशावकप्रदानस्य पितलनिर्मितकंसप्रदानस्य च रीतिरासीत्।

---

१. TRIBAL CUSTOMERY LAW AND WOMEN'S STATUS : AN INTRODUCTION (Page -134)

२. खेरोयाल वंश धरम् पुथि (पृ.सं. - ५४)

३.खेरोयाल वंश धरम् पुथि (पृ.सं.-५५)

चतुर्थोध्यायः. स्मृतिकलिनऽर्थव्यवस्था

(व्यापारः, शासनव्यवस्था, कार्यकौशलश्च)

स्मृतिशास्त्रानुसरं कस्य अपि सम्पदः क्रय-बिक्रयसमये क्रेतुः बिक्रेतुश्च पक्षतः अनेकजनाम् उपस्थितेः विधानम् अस्ति।

स्मृतिशास्त्रानुसरेन उत्तमर्णस्य ऋणदाने अधमर्णस्य ऋणग्रहणे, सुद्-प्रदाने, मूल-अर्थग्रहने च प्रभृतिविषये ब्राह्मणादि वर्णेषु उत्तरोत्तर बर्णाः अधिकसुयोगं प्राप्नुवन्ति । अथः ऋणपरिशोधक्षेत्रे अक्षमः दुर्बलः बा यदि ब्रह्मणः भवति तर्हि स अधिकसुयोगं प्राप्नोति १ । तथैव अपरापर वर्णानां क्रमशः ह्रासः भवति ।

अद्यतनेन ऋणदानेन सह स्मृतिशास्त्रीय-ऋणदानस्य बिधानेषु समता विद्यते। किं च ऋणदानस्य प्रत्याबर्तनस्य च सर्वे विषयाः यथा - उत्तमर्णस्य अधमर्णस्य च नाम - दिनाङ्क - बत्सर - शर्तश्च लिखितरुपेनसंरक्षणीय इति व्यवस्था आसीत्।

साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्।

अत्राहम् अमुकः साक्षी लिखेयुरिति ते समाः।।२

इतोऽपि ऋणग्रहनकाले ऋणकर्तुः परिवारस्य अपरसदस्यानाम् उपस्थितिः ऐकान्तिकरुपेन काम्यते।

१.याज्ञबल्क्य-संहिता : व्यवहार-अध्यायः(श्लोक - ४३)

२.याज्ञबल्क्य-संहिता : व्यवहार-अध्यायः(श्लोक - ८७)

स्मृतिशास्त्रानुसरं पैत्रिक-सम्पदः पिता कस्मै पुत्राय , कथं दास्यति इति अस्य अधिकारः पितुः एव आसीत् ?१ परं स्नेहबशात् कस्मै अपि पुत्राय यदि किंचित् सम्पदः यछेत् तर्हि सम्पदवण्टनसमये तस्य सम्पदः पुनराहरणाय किमपि न विहितम्। इतोऽपि स्मृतिशास्त्रे द्वादशपुत्राणां कथा अपि वर्णिता । यथा -

औरसपुत्रः, पुत्रिकापुत्रः, क्षेत्रजपुत्रः, गुडजपुत्रः, कानीन्-पुत्रः, पुनर्भूपुत्रः, पौनर्भवपुत्रः, दत्तकपुत्रः, क्रीतपुत्रः, कृत्रिमपुत्रः, स्वयंदत्तपुत्रः , सहडोजपुत्रः, अपविद्धपुत्रः च इति।२

एतेषु द्वादशपुत्रेषु पूर्वपुत्रस्य अभावात् परोल्लेखितः पुत्रः धनं प्राप्नुयात्। सन्तालीसमाजे अपि सम्पदवण्टनविषये पितुः अधिकारः गुरुतरः इति प्रचलितः।

स्मृतिशास्त्रे स्त्रीधनम् एकः गुरुत्वपूर्णः विषयः। विवाहात् प्राक्, विबाहकाले, विवाहात् परं च प्राप्तधनम् एव स्त्रीधनं इति वर्णितम् । अस्य धनस्य अधिकारः कण्यानाम् एव भवति । परन्तु मातुः बियोगात् परं यदि तस्याः किमपि ऋणम् अवशिष्टम् भवति तर्हि तस्य परिशोधं कृत्वा कन्याः प्राप्नुयुः३। बहुषु कण्यासु यदि कापि अबिबाहिता अप्रतिष्ठिता च गृहे तिष्ठेत् तर्हि स्त्रीधनं पूर्णतया सा एव प्राप्नुयात् । पुनः पितुः इच्छानुसरं पितृधनं पुत्राणाम् इव कन्याभ्यः अपि दातुम् अर्हति ।

१.याज्ञबल्क्य-संहिता : व्यवहार-अध्याय: (श्लोक -१२३)

२.याज्ञबल्क्य-संहिता : व्यवहार-अध्याय: (श्लोक -१२८ - १३२)

३.याज्ञबल्क्य-संहिता : व्यवहार-अध्याय: (श्लोक -११७)

पञ्चमोध्यायः:- सन्ताली - अर्थव्यवस्था

स्मृतिशास्त्रानुसरं कस्य अपि सम्पदः क्रय-बिक्रयसमये क्रेतुः बिक्रेतुश्च पक्षतः अनेकजनाम् उपस्थितेः विधानम् अस्ति।

परन्तु सन्तालीसमाजे तस्मादपि जनात् अन्यसमाजस्य केनोऽपि सम्पदः क्रेतुं न शक्यते । इतोऽपि यदि अपरस्य समाजस्य कोऽपि सम्पदः क्रेतुम् इच्छति तर्हि ग्राम-प्रधानस्य ग्रामाधीनस्य च सम्मतिपत्रप्रयोजनं भवति ।

सीमा विवादः सीमा बिषयकः विवादः। विवादोऽयं प्रकारद्वयेन भवितुम् अर्हति। यथा - ग्रामद्वयस्य प्रन्तीयक्षेत्रसीमाद्वयस्य मध्ये विवादः भवेत् तथा च एकस्य एव ग्रामस्य क्षेत्रसीमा द्वयोः विवादः भवेत्।१

षड्विधाः सीमा विवादा: स्मृतिशास्त्रे वर्णिताः । उक्ता: षड्विधाः सीमाविवादाः उपस्थिते सति सामन्तगणः तथा निकटस्थ: भुस्वमी ग्रामबासी बा तथा गोपालकः वयःवृद्धकृषकगण: , बनाचरीव्याधः बा तेभ्यः बिबादेभ्यः प्रमाणं दातुम् अधिकारीणः भवन्ति २ ।

आदिवासी समाजेऽपि सीमाविषयकविवादाः वर्तमाना । अत्र ग्रामद्वयस्य सीमाद्वये विवादाः यदा उपस्थिताः भवन्ति तदा ग्रामद्वयस्य प्रधान: तथा पञ्च-मोड्लाः (माझि, जगमाझि, पाराणिक, गोडेत् , सह-पाराणिक) साध्यानुसरं समाधानाय प्रयासं कुर्वन्ति। तत्र यदि समाधानं न भवति तर्हि ल-बीर-वायसी इति अनया विचारव्यवस्थया तस्य बिबादस्य समाधानं क्रियते । सामाजिकानुशासनदिशा इत्येव सर्वोत्कृष्टविचारव्यवस्था इति मन्यते । अस्याः विचार व्यवस्थाया: उपरि अपरः कोऽपि आबेदनः न स्वीक्रियते ३ । पुनः द्वितीयप्रकारविवादः तथा एकस्य एव ग्रामस्य क्षेत्रसीमाद्वयोः विवादे उपस्थिते ग्रामस्य पञ्च-मोड्लाः समाधानाय प्रयासं कुर्वन्ति । यदि ते समाधातुं न शक्यते तर्हि पूर्वोक्त विचारसभायां विबादस्य स्थानान्तरं क्रियते ।

१.याज्ञबल्क्य-संहिता व्यवहार-अध्याय (श्लोक -१५०)

२.याज्ञबल्क्य-संहिता व्यवहार-अध्याय (श्लोक -१५१)

३.खेरोयाल वंश धरम् पुथि (पृ.सं.-४९)

षष्ठोध्यायः - स्मृतिकलिन - सन्ताल्योः च गुणदोषाणां समीक्षणम्

बहूनि युगानि हिन्दूजनैः मुसलिम जनैः च साकं निबसन्नपि " सान्ताल" इत्येते सामाजिकस्वातन्त्र्यम् न बिलोपयन्ति। वस्तुतः तेषां राष्ट्रीयबिधानानाम् अपेक्षया सामाजिकप्रथां प्रति अनुगत्याधिकः। इत्यस्य अन्यतमः प्रमाणः विचारव्यवस्था। "सन्ताल" इत्येतेषाम् ग्रामे विशिष्टान् पञ्चजनान् नित्वा निर्माणं भवति ग्राम-पञ्चायेतस्य ग्राम-षोलोआनायाः वा । ते पञ्च-जनाः भवन्ति - माझि, पाराणिक, जगमाझि, गोडेत, नायके[1] च इति । ततः अनेकानाम् ग्रामाणां प्रधानान् नित्वा पारगाना पञ्चायेतस्य निर्माणं भवति । पारगाना पञ्चायेतस्य प्रधानस्य नाम पारगाना। उपरि उक्तायाः व्यवस्थायाः बृहत्तरा व्यवस्था देश-पञ्चायेतः। सन्तालसमाजे देशः इत्युक्ते निर्दिष्टः परिसरं बोधयति। अस्याः त्रिस्तरियविचारब्यबस्थाया: बहिः विद्यते " ल - बीर बायसी " (सुप्रिम कोर्ट) इति । जटिल-बिषयादिं संगृह्य एकस्मिन् वर्षे केवलम् बारमेकम् आयोजयते अयं बिचारालयः । स्थानीय-समस्यानानाम् समाधानं भवति ग्राम-पञ्चायेते । ग्राम-पञ्चायेते येषां समस्यानाम् समाधानं न भवन्ति तेषामुपस्थापणं पारगाना-पञ्चायेते भवन्ति। इतोऽपि पारगाना-पञ्चायेते येषां समस्यानाम् समाधानं न भवन्ति तेषामुपस्थापनं देश-पञ्चायेते भवन्ति । सर्वोपरि "ल - बीर बायसी"[2] इत्यस्य अधीने विचारव्यवस्थाया: सर्वोच्चः शक्ति: विद्यते ।

अपरतया हिन्दुजाते: तथा अर्यजाते: विचारव्यवस्थामुलकग्रन्थाः स्मृतिशास्त्रः तथा मनुसंहिता, याज्ञवल्क्यसंहिता अर्थशास्त्र: प्रभृतयः। एतेषु ग्रन्थेषु तत्कालीन सामाजिकनियमाः न्यायव्यवस्था विचारव्यवस्था च वर्णिता सन्ति । यद्यपि एतेषु ग्रन्थेषु राजतन्त्रिक-बर्णतान्त्रिक - समाजव्यवस्थायां राज्ञः ब्राह्मणस्य च सामर्थ्य: प्रकाशितः अस्ति। तर्हि अर्यजनाः अनार्यजनाः च उभयोरपि यद्यपि एकस्मिन्नेव समये भारतभूमौ अवस्थानम् कृतवन्तः तस्मात् उभयस्य शासने विचारव्यवस्थायां च बहुविधसादृश्यबैसादृश्यणां च अलोचना अद्यतन दिने प्रयोजनम् इति मन्ये ।

---

१. खेरोयाल वंशः धरम् पुथि (पृ.सं. - ३९)

२. खेरोयाल वंशः धरम् पुथि (पृ.सं. - ४९)

शोधक्रम:

१. स्मृतिग्रन्थानां सन्तालीविचारधाराविषयकग्रन्थानाञ्च विशदध्ययनं करिष्ये ।

२. अध्ययनाधारेण प्रस्तावितेन शोधविषयेन साकं शोधसामग्रीणाम् एकत्रकरणं करणीयम्।

३. एकत्रितसामगृन् अध्ययनानुसारं विश्लेषणम् कृत्वा शोधप्रबन्धनरूपेण संयोजनं कुर्याम् । विषयवस्तुनां प्रस्तुतिकरणं वर्णनात्मकशैलिभिः, तुलनात्मकशैलिभिः, समीक्षात्मकशैलिभिः च करिष्ये।

उपसंहारः:-

वर्तमानसमयः बिश्वायनस्य युगः। अस्य बिश्वायनस्य प्रभावः सर्वेषु जातिषु अपि दृश्यते । स्मृतिशास्त्रीयनियमानां धारक-बाहकश्च मुलहिन्दूसमाजः भारतीयमूलन्यायेन विचारधारया च पूर्णतया परिवर्तनम् अकोरत् । परन्तु बिश्वायनयुगे सन्तालसमाजे अनेकाः रीति-नीतिः , नियमाः , न्यायव्यवस्थाः च अपरिबर्तिता । उदाहरणरूपेन वक्तुं शक्यते -

विवाहकाले त्रीणि रूप्यकाणि सप्त रूप्यकाणि बा कन्यापणरुपेन प्रदानप्रथा अद्यापि प्रचलिता। तेषां विवाहे नृत्यं (दं एनेच्) अद्यापि अपरिबर्तितम् अस्ति। ग्रामशासननियमाः अद्यापि पञ्च-मोड़्लैः नियन्त्रिताः भवन्ति ।

सन्दर्भ: ग्रन्थसूची:-

अस्य विषयस्य आलोचना कुर्वन् येषां ग्रन्थानां साहाय्यं गृहीतं ते ग्रन्थाः निम्ने उल्लेखिता: -

ग्रन्थः	**ग्रन्थकार:**	**प्रकाशक:**
KHEROWAL BANGSA DHARAMPUTHI	MAJHEE RAMDAS TUDU , RESKA, D.LIT,	MONFAKIRA
सेरओया आर आरिचालि	दुर्गादास मुरमु	श्यामापद मुरमु ,बाकुडा प्रेस
KHERWAL BANGSA DHARAM PUTHI	SARADA PRASAD KISKU	NIRMAL KUMAR SAHA, NIRMAL BOOK AGENCY
SANTALI SAHITYER ITIHAS	PARIMAL HEMBRAM	NIRMAL SAGITYAM
आदिवासी जगत् ओ स्वदेश चर्चा	श्री स्वपन कुमार दास	आदिवासी साहित्य प्रकशनी
याज्ञबल्क्य संहिता (व्यवहार-अध्याय)	श्रीमती सुमिता वसु न्यायतीर्थ	श्री देवाशिस भट्टाचार्य संस्कृत पुस्तक भाण्डार
मनुसंहिता (सप्तमोध्यायः)	डः अनिल चन्द्रः वसु	श्री अभयं वर्मन्, संस्कृत बुक डिपो
मनुस्मृति	ज्वालाप्रसाद चतुर्वेदी	रणधीर प्रकाशन
आश्वलायन गृह्यसूत्र	काब्यालंकारभूषण	कर्णाटक प्रिंटिंग प्रेस
कौटिलीय अर्थशास्त्र	प्रो. उदयवीर शास्त्री	संस्कृत पुस्तकालय
ATRI SAMHITA	MANMATHA NATH DUTT (Shastri)	
APASTAMBHA SMRTIH	Dr. PRAYAG NARAYAN MISHRA	GYAN BHARATI PUBLICATION
GOUTAM DHARMASUTRA	PRAMODVARDHAN KOUNDINYAYAN	CHAUKHAMBA VIDYA BHAWAN
TRIBAL CUSTOMARY LAW AND WOMEN'S STATUS : AN INTRODUCTION		
TRIBAL LAW AND JUSTICE	W.G. ARCHER	
THE KHERWAL CUSTOMARY LAW'S	SAKILA SOREN	